**विद्या भवन बालिका विद्यापीठ लखीसराय**

**वर्ग दशम् विषय संस्कृत शिक्षक श्यामउदय सिंह**

**ता:-२८/०७/२०२०(एन.सी.ई.आर.टी. पर आधारित प्रश्न)**

**प्रथम सामयिक मूल्यांकन हेतु पुनरावृत्ति**

*अधोलिखितगद्यांशं पठित्वा तदाधारितानां प्रश्नानां उत्तराणि संस्कृतभाषया लिखत-

इति श्रूत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलो नष्टः।

भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः शृगालः हसन्नाह –"भवान कुतः भयात् पलायितः ?"

व्याघ्रः--गच्छ, गच्छ जम्बुक ! त्वमपि किञ्चिद् गूढप्रदेशम् ।यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धं परं गृहीतकरजीवतो नष्टः शीघ्रं तदग्रतः।

शृगालः-व्याघ्र !त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि?

व्याघ्रः-प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा ।

**एकपदेन उत्तरम् दीयताम्-**

(i) कीदृशः व्याघ्रःनष्टः?
(ii) शृगालः किं कुर्वन् आह?
(iii) कं दृष्ट्वा शृगालः अवदत्?
(iv) शृगालः कीदृशःआसीत्?

**पूर्णवाक्येन उत्तरत-**

(i) व्याघ्रः जम्बुकं प्रति किं कथयति ?
(ii) शृगालःव्याघ्रं प्रति किं प्राह?

**भाषिककार्यम्**

(i) ' जम्बुकः' इति पदस्य पर्यायपदं गद्यांशे किम् अस्ति?
(ii) 'शृगालः' इति पदस्य विशेषणपदं अनुच्छेदे किं अस्ति?
(iii) 'आह'इति क्रियापदस्य कर्तृपदं किम्?
(iv) 'रुदन्' इति पदस्य विलोमपदं गदयांशे किम् ?